अङ्क-२५
जनवरी-जून २०१५

**वेदविद्या**
ISSN-2230-8962

# आधुनिकशिक्षाणामाधारो वेदः

**डॉ. सुजाता त्रिपाठी**

प्रत्येकं सौन्दर्यं प्रति आकर्षणं मनुष्याणां सहजप्रवृत्तिरेव। कुत्रचित् तत् सौन्दर्यं रूपे स्यात्, कुत्रचित् वर्णे, कुत्रचित् कृत्रिमतायां, कुत्रचित् स्वाभाविकतायाम्। सुन्दरतायाः कश्चिदाधारः किम् ? चिन्तयति सति ज्ञास्यामो यत् सौन्दर्यताया आधारः सा कृति यस्याः वर्णरूपाकृत्यादयः अवयवाः सन्ति। कलाकारो निर्मिते यस्मिन्नंशे यथा भावमुत्पादयति उत्पादयितुं वेच्छति तथैव कला तस्मिन् समाविष्टं करोति। केयं सृष्टिः ? ईश्वरस्य कलायाः एका आकृतिर्मात्रम्[१]। सृष्टिकारणरूपा कला त्रिविधात्मिका यस्याः प्रतीकरूपेण सन्ति-सत्यं शिवं सुन्दरम्। अत एव भारतीयसंस्कृतौ कलायाः अस्तित्वं सत्यमनादिश्च मन्यते। सृष्टेः आदौ ईश्वरस्य अस्तित्वं सर्वे धर्माः स्वीकुर्वन्ति स्म। वेदेषु सः पुरुषस्य हिरण्यगर्भस्य च सञ्ज्ञया निर्दिष्टः। ऋग्वेदस्य मन्त्रमिदं द्रष्टव्यम् –

**"हिरण्यगर्भः समवर्तताग्रे....................."**

एतस्मात् हिरण्यगर्भात् विराट्पुरुषात् वा अनेकाः कलाः उत्पन्नाः जाताः। **"चन्द्रमा मनसो जातः०"**[२] इत्यादयः। प्राकृतिका सम्पत्तिरपि ईश्वरस्यैव इति मन्यन्ते। यथा - यज्ञपुरुषात् पर्जन्यः पर्जन्याच्च भूतेभ्यः अन्नादीनामुत्पत्तिरिति कथ्यते।

बृहदारण्यकोपनिषदि कथितमस्ति यत् कलाकारस्य (अमूर्तब्रह्मणः) दर्शनं तस्य कृत्या (मूर्तसृष्ट्या) भवति[३]। यथा- उपर्युक्तविवरणात् सर्वप्रथमं कलायाः उद्गमस्थानं ज्ञायते। सृष्टौ विद्यमानाः अनेकाः कलाः (यस्याः स्वरूपमद्यापि लभ्यते एतदतिरिक्ताश्चान्याः कलाः) वैदिकवाङ्मये वर्णितास्सन्ति। यथा- धनुर्विद्या, सङ्गीतकला, नृत्यकला कवित्वप्रदर्शनादयः। वैदिकवाङ्मये निहिताभिः साक्षीभिः ज्ञायते यद् वैदिकयुगे क्रीडाकौतुकं चित्रकलादयस्तु आसन्नेव। तैः सहैव ललितकला अपि मनोरञ्जनस्य साधनानि आसन्। कौषीतकीब्राह्मणे नृत्यगीतवादनानां सामूहिकं नाम शिल्पम् इति आसीत्।

नैतावत्पर्यन्तमपितु ऋषिगणा अपि अवकाशसमये कलाकृतेः निर्माणं कुर्वन्तिस्म। ऋग्वेदानुसारेण भृगुऋषेः वंशजाः काष्ठकलायाः विशेषज्ञाः आसन्[४]। भित्तिचित्रं द्वारदेव्या रचना अलङ्करणादीनामुल्लेखः

---

[१] छान्दोग्योपनिषद् ४.५.३
[२] पुरुषसूक्तम्; ऋग्वेदः १०.९०.१३
[३] बृहदारण्यकोपनिषद् २.३.१
[४] ऋग्वेदः १०.३९.१४

वेदेषु प्राप्यते[५]।

प्रस्तुते मन्त्रेऽग्निदेवस्य चित्रस्य स्पष्टोल्लेखः प्राप्यते, यज्ञशालानां द्वारेषु हिरण्यमयीनां देवीनां रचनाविधानं भवन्ति स्म। एतासां रचनानां महर्षिः पाणिनिः प्रतिकृतेः सञ्ज्ञा दत्तवान्। यासां सम्प्रति व्यवहारे उवकंसे इति कथ्यते। एतासु द्वारदेवीषु रात्रिं उषसञ्च देव्यौ प्रधानरूपेण कथ्यन्ते। एतासां देवीनां अलङ्करणस्य चर्चा ऋग्वेदे उषस्सूक्ते रात्रिसूक्ते च प्राप्यते। एकोदाहरणं प्रस्तुतमस्ति (उषस्सूक्तम्)।

वैदिकवाङ्मये कलायाः भव्यनिरूपणं रामायणे महाभारते च वर्णितमस्ति। बालकाण्डस्य षष्ठसर्गे अयोध्यायाः नगर्याः वर्णनसमये तात्कालिक्याः शिल्पकलायाः भवननिर्माणकलायाः आदीनां अनुपमचित्रणं प्राप्तं भवति, एतदतिरिक्तं सौन्दर्यप्रसाधनम्, अङ्गरागः, केशसज्जा, राजप्रासादः, रथाः, नगराणि, उद्यानानि, एतेषां कलापूर्णरचनायाः वर्णनाद् वैदिकसमाजस्य कलानुरागितायाः बोधो जायते।

रामायणे वर्णितस्य अश्वमेधयज्ञस्य अवसरे भगवत्याः सीतायाः स्वर्णमयीप्रतिमायाः निर्माणं तात्कालिकी उत्तमशिल्पकलायाः परिचायकमस्ति। वाल्मीकिः लिखति रामायणे[६] । शिल्पकलायाः एकमन्यमुदाहरणं दृष्टिपटले अङ्कितं भवति यदा प्रस्तुते श्लोके वाल्मीकिः रावणस्य पुष्पकविमानस्य वर्णनं करोति। महाभारतस्य सभापर्वणि युधिष्ठिरस्य सभायाः वर्णनं कुर्वन् भगवद्व्यासः तात्कालिकीं चित्रकलां प्रस्तुतं कुर्वन् लिखति -

सङ्गीतकलायाः यत्र चर्चा भवति तत्र सम्पूर्णसामवेदः उपस्थितो भवति। सामवेदस्य ऋचाणां पाठस्य गायनात् समवायसम्बन्धो वर्तते। एतेन देवताः सङ्गीतज्ञाः इति ज्ञायते। उदाहरणार्थं - प्रत्येकानां राज्यसभानां वर्णनं कुर्वन् वैदिकवाङ्मये स्थाने-स्थाने सङ्गीतस्य नृत्यकलायाश्च विशदं चित्रणं प्राप्यते। उर्वशी, मेनका इत्यादयः देवतानां सभायाः प्रमुखाः सर्वकलाप्रवीणाश्च नृत्याङ्गनाः मन्यन्ते। उदाहरणार्थं वैदिकवाङ्मये निहितप्रमाणैर्विदितो भवति यद् वैदिकसमाजः कलाप्रेमी आसीत्। वैदिकयुगे प्रत्येका कला एका साधनारूपे साधयति स्म। वैदिकवाङ्मये कलां मनोरञ्जनस्य साधनं न मत्वा आराधनायाः तपस्यायाः वा रूपं प्रदत्तमासीत्। एवञ्च कलानैपुण्यं तस्याः तपस्यायाः फलम्।

वैदिकवाङ्मये वर्णितानां कलासूचीनामन्तर्गते वास्तुकलायाः अप्युल्लेखोऽभूत्। गृहभवनादीनां निर्माणस्योचितस्थितिः, कक्षाणाम्, गवाक्षाणाम्, अट्टालिकानां निर्माणोचितदिशायाः निर्देशोऽस्ति। व्यवस्थितगृहनिर्माणं न केवलम् इष्टिकापाषाणादीनां संयोगरूपमपितु सुखसमृद्धिस्वास्थ्यपवित्रतादीनां सङ्गमस्थलोऽस्ति। यथा वेदस्यैतन्मन्त्रे कथितोऽस्ति।

**ऊर्जस्वती पर्यस्वती पृथिव्यां निर्मिता मिता।**

---

[५] ऋग्वेदः १.१.४५

[६] वाल्मीकिरामायणे ७.९९.७

**विश्वान्नं बिभ्रती शाले मा हिंसीः प्रतिगृह्णतः ॥**[७]

अर्थात् यस्याः शालायाः यस्य गृहस्य निर्माणं भवेत् तत् -

1. ऊर्जस्वती - बलारोग्ये पराक्रमे च वृद्धिं प्राप्नोतु।
2. दयस्वती - अर्थात् यत्र पेयं जलदुग्धदधिघृतादीनां नानानां रसादीनां व्यवस्था भवेत्।
3. पृथिव्यां निर्मिता मिता - अर्थात् यस्य सुन्दरतां कलां दृष्ट्वा गृहपतेः प्रशंसा भवेत्।
4. विश्वान्नं विभ्रती - तद्गृहे खाद्यान्नपदार्थाः ऐश्वर्यञ्च भवेयुः।
5. प्रतिगृह्णतः मा हिंसीः - तत्र निवासिनां कण्टादयः न प्रभावमुत्पादयेयुः।

आधुनिकसमये गृहस्य मानचित्रं स्वीकृतं कारयन्ति। यतः तत्र निवासिनामनुकूलानां नियमानाञ्चान्तर्गत एव गृहनिर्माणं भवत्विति। एतत्प्रकारमेव वेदे निर्देशः प्राप्यते यथा—

**ब्रह्मणा शालां निर्मितां कविभिर्निर्मितां मिताम्।**
**इन्द्राग्नी रक्षतां शालाममृतौ सौम्यं सदः ॥**[८]

अर्थात् वेदज्ञानां विदुषामभिरुचेः सर्वेषु ऋतुषु सुखदाः शाला निर्मातु, एतत्ध्यातव्यम्। उत्तमैः विद्वद्भिः शिल्पकारैः प्रमाणयुक्ता शाला स्यात्। वायोः अग्नेश्च सहयोगेन प्रतिकूलतापसरति। (अत एव वायोः अग्नेश्च स्थानं स्मृत्वैव शालायाः निर्माणं भवतु)। एताभिः सर्वाभिः सुविधाभिः पूर्णमैश्वर्यदं सुखदञ्च निवासाय गृहमेव ग्राह्यम्।

**हविर्धानमग्निशालां पत्नीनां सदनं सदः।**
**सदो देवानामसि देवि शाले ॥**[९]

अथर्ववेदस्यास्मिन् मन्त्रे गृहाभ्यन्तरस्य रचनायाः प्रारूपं वर्णितमस्ति। गृहे होमस्थानम्, स्त्रीणां निवासाय पृथक् स्थानम्, विदुषां च निवासस्थानम्, मेलनस्थानम्, ध्यानादिस्थानञ्च पृथक् भवेत्। एतादृक् शाला सुखदमुपयाति। वेदेषु स्थापत्यकलायाः स्वरूपस्य सङ्क्षिप्तोल्लेखः प्राप्यते। वैदिकसमाजे एतत्कलायाः विकासोऽभवदित्यस्य प्रमाणमवश्यमेव लभ्यते।

**नमो भुवन्तये वारिवस्कृताय॰** इति मन्त्रे नूतनभूमिं वासयोग्यं निर्मातुं निर्मातुः स्तुतिरस्ति। **नमस्तक्षभ्यः॰** इति मन्त्रे शिल्पिनश्च। रथनिर्मात्रे **रथकारेभ्यश्च वो नमः**, एवञ्च अयस्काराय **कर्मारेभ्यश्चवो नमः** इति निर्देशं दत्तमस्ति। एतदतिरिक्तं गृहनिर्माणे **नमो गह्वरेष्ठाय च** इति मन्त्रोल्लेखः कृतः अस्ति, वेदस्य मन्त्रेणैतेन पर्णशदाय च ज्ञायते यत् तत्समये एतादृशाः कलाकाराः आसन् ये पात्राणां कर्तने

[७] अथर्ववेद ९.३.१६
[८] अथर्ववेद १.३.१
[९] अथर्ववेद १.३.७

कृत्रिमपर्णनिर्माणे च दक्षाः आसन्। **"सानुभ्यो गम्भकम्"** एतेन ज्ञायते यत् तत्समये शैलशिखरान् विच्छिद्य मार्गनिर्माणे निपुणाः शिल्पिनः आसन्।

वैदिकवाङ्मये विभिन्नानां कलानामेवावलोकनेन स्पष्टं भवति यदवश्यमेव एतान् कुशलान् शिल्पिनो विध्यनुसारेण शिक्षाप्रदानं कारयन् आसन्। आगम्यतामस्मिन्नेव क्रमे वैदिकवाङ्मये निहितशिक्षायाः स्वरूपं वैभिन्यादीनामवलोकनं कुर्मः।

शिक्षायाः विभिन्नस्वरूपाणि यथा - राजनीतिशिक्षा, सैन्यशिक्षा, चिकित्साविज्ञानं, कृषिशिक्षा, यन्त्रनिर्माणशिक्षा भाषाविज्ञानशिक्षा पशुपालनशिक्षेत्यादयः आधुनिकशिक्षाणां वैदिकस्वरूपं वैदिकवाङ्मये दृष्टिगोचरो भवति। राजनीतिशिक्षान्तर्गतशासकसभासमितिसेनादीनामावश्यकतायाः प्रतिपादनं कुर्वन् वेदः कथयति - **"तं सभा च समितिश्च सेना च ०"**[१०] अर्थात् सुरक्षाव्यवस्थां सुदृढकरणार्थं सभाऽपि भवतु समितिरपि। "राजृ दीप्तौ" धातोः राजा इति निष्पन्नो भवति। यो दीप्तिमान् अर्थात् श्रेष्ठगुणैः जनसामान्यमध्ये प्रतिष्ठितोऽस्ति तद्राजा पदेनाभिधीयते। एतस्याः सृष्टेः व्यवस्थार्थं विश्वशासकसम्राजः सत्तास्थापनं कुर्वन् वेदः कथयति - **"सम्राडेको वि राजति"**[११] तथा च इत्यस्मिन् मन्त्रे **"भूतस्य जातः पतिरेक आसीत्"**[१२] भूपतेरावश्यकता वेदाः स्वीकुर्वन्ति। राज्ञः प्रजानां च मध्ये सामञ्जस्यं स्थापयितुं त्रिप्रकारिकायाः सभायाः निर्मातुं निर्देशः वेदेषु प्राप्यते। यथा -

**"त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि"** [१३] सभामेतां प्रथमसदनजन-सामान्यानामावश्यकतां शासनसमक्षे प्रस्तुतव्यम्। द्वितीयसदने तदावश्यकतां योजनानुसारं विधाय अनुमानितं व्ययं स्वीकृत्य तृतीयसदनसमक्षे प्रस्तुतव्यम्। तृतीयसदने अनुमानितव्ययानुसारं योजनाः सञ्चालयितव्यम्। शासने समानतायाः यानुशंसा सम्प्रति कालेऽस्ति वेदेऽपि तस्या दर्शनं भवति।

**"विभक्तारं हवामहे वसोश्चित्रस्य राधसः सवितारं नृचक्षसम्"**[१४] वेदस्य प्रस्तुते मन्त्रे कथितमस्ति यद् राष्ट्रे निवासयोग्यभूमेः वस्त्राणां धनाद्यैश्वर्याणां सर्वेभ्यः समरूपेण व्यवस्थां कर्तुं वयं प्रशंसां स्तुतिं च कुर्मः। राजनीतिशिक्षान्तर्गते शासनव्यवस्थायां विभिन्नविभागेभ्यः योग्यजनानां नियुक्त्यर्थं स्पष्टं निर्देशं दत्तमस्ति। यथा - **"ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रं तमसे तस्करं नारकाय वीरहणं पाप्मने क्लीबमाक्रयाया अयोगूं कामाय पुंश्चलूमतिक्रुष्टाय मागधम्"**[१५]

---

[१०] अथर्ववेदः १४.९.२
[११] अथर्ववेदः १२.१.१७
[१२] ऋग्वेदः ३.३४.६
[१३] ऋग्वेदः ३.३८.६
[१४] यजुर्वेदः ३०.४
[१५] यजुर्वेदः ३०.५

अर्थात् ब्राह्मणोचितकर्मणे ब्राह्मणानां, राज्यादीनां संरक्षणाय शासकीयगुणसम्पन्नक्षत्रियाणां, पदार्थाणामायातनिर्यातहेतुः वायोः वेगसदृशः कार्याय वैश्यानां, प्रकाशहीनक्षेत्रेषु कार्याय तमसविद्यायां निपुणानां तस्कराणां, कारागारादीनां व्यवस्थार्थं प्रशिक्षितानां मनुष्याणां नियुक्तिः भवेत्। अपराधावरोधनाय केन्द्रो भवेत् येन पापवृत्तयः नपुंसकत्वमेतु।

यत्र प्राणिनामावागमनमधिकमस्ति तत्र लौहनियन्त्रकविभागानां (यातायातनियन्त्रणविभागानाम्) स्थापना भवेत्। कामवासनादीनां नियन्त्रणहेतुः निन्दनीयकार्याणां कर्तुः जीवनं तद्दुष्परिणामञ्च समाजे स्थापयेत् ; येन दुष्परिणामात् रक्षां भवतु। राष्ट्रहिताय कस्यचित् कार्यस्य विरोधेऽथवानुकूले सति तत्प्रचाराय **"मागधम्"** इति नामकं विभागस्य स्थापना भवेदित्यस्य सङ्केतो वेदे प्राप्यते।

चिकित्साशास्त्राणां शिक्षाप्रदानं कुर्वन् वेदेषु आध्यात्मिकाधिभौतिकाधिदैविक इति नाम्ना त्रयाणां दुःखानां वर्णनमस्ति। वेदस्य "भुवः शक्तिः" या दुःखनारीका शक्तिरस्ति, सृष्टेः समस्तेषु पदार्थेषु विद्यते, सूर्याग्निवायुजलेषु भेषजतत्त्वानां वर्णयन् वेदो वदति **"सूर्य आत्मा जगतस्तस्थुषश्च"**[१६]। तथा च **"उद्यन्नादित्यः क्रिमीन् हन्तु ०"**[१७] अर्थात् उदयन् सूर्यस्य रश्मयः कृमीणां नाशकः। ब्राह्ममूहूर्ते उत्थाय सूर्यार्घ्यदाता, नित्ययज्ञकर्ता सर्वदा स्वस्थाः भवन्तीति अद्यापि मन्यन्ते। यजुर्वेदस्यास्मिन् मन्त्रे भेषजयज्ञानामुपयोगिता वर्णिताऽस्ति।

**"देवा यज्ञमतन्वत भेषजं भिषजाश्विना। वरुणं भिषजां पतिम् "**[१८], **"शमिता नो वनस्पतिः "**[१९] एतयोः मन्त्रयोः वरुणे वनस्पतौ च भेषजतत्त्वानि सन्तीति कथ्यते। वेदेषु "सोमम्" औषधीनां राजोच्यते। यज्ञक्रियायां प्राणवायुना याज्ञिकाः एनं सारल्येन प्राप्नुवन्ति इति प्रस्तुतमन्त्रेण विदितो भवति। **"यदत्र रिप्तं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः। अहं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि"**[२०] औषधीनां सेवनकालस्य सम्बन्धे यजुर्वेदे वर्णितोऽस्ति **"या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥"**[२१]

अर्थात् या औषधिः पृथिव्यां जले च उत्पन्ना भवति तां त्रिवर्णानन्तरं उचितरूपेण पक्वं वैद्यकशास्त्रानुसारेण ग्रहणीयम्। एषौषधिः शरीरस्य सप्तोत्तरशतमर्मस्थानेषु प्रभावं करोति। अपक्वं न खादयितव्यम्। वेदेषु शङ्खमौषधीरिति कथयन् एतं अमत्याः नाशकः विकाराणां प्रशमकः कथ्य आसीत्।

---

[१६] यजुर्वेदः ७.४२
[१७] अथर्वः २.३२.१
[१८] यजुर्वेदः २१.४०
[१९] यजुर्वेदः २१.२१
[२०] यजुर्वेदः १९.३५
[२१] यजुर्वेदः १२.७५

यथा - **शङ्खनामीवाममतिं शङ्खेनोत सदान्वाः। शङ्खो नो विश्वभेषजाः कृशनः पात्वंहसः॥**[22]

एतदतिरिक्तं रुधिरस्रावनिवारणार्थं, हृदयरोगनिवारणार्थं, ज्वरनाशनार्थं, विषमपाकर्तुमनिद्राम-पाकर्तुमित्यादिरोगाणां समूलनाशनार्थं मन्त्राः अथर्ववेदस्य पृथक्-पृथग् अध्यायेषु वर्णिताः सन्ति। शल्यचिकित्साया अपि सविस्तरेण वर्णनमथर्ववेदे प्राप्यते। एताः औषधीः उचितरूपेण ज्ञातव्यं रोगोपचारान्नपि इत्यपि वेदे निर्दिष्टम्।

सर्वेभ्यः प्राणिभ्यः आहार अनिवार्यमस्ति। मनुष्याः कृषिकर्मणा एतस्य पूर्तिं कुर्वन्ति। पृथिव्याः अन्नफलादीनां खाद्यपदार्थाणामुत्पत्तिकरणमेव कृषिकर्म। वेदेषु कृषिविज्ञानस्योल्लेखं कुर्वन् वपनकार्यस्य आधारभूतायाः पृथिव्याः स्वरूपमपि वर्णितमस्ति। यथा - **"भूमिरावधनं महत्"** अर्थात् अस्यां भूमौ पुरुषार्थस्य वपनं कुर्वन्तु। पृथिव्याः उत्पादनक्षमतायां वृद्धये यज्ञस्य प्रयोगं करणीयं यथा वेदमन्त्रः कथयति - **"पृथिवी च मे यज्ञेन कल्पन्ताम्"**[23], **"अन्नं साम्राज्यानामधिपतिः"** अनेन मन्त्रेण अन्नस्य प्रधानतायां व्याख्यां कुर्वन् वेदः कथयति यत् श्रेष्ठान्नप्राप्तये धान्यानुचितविधिना वपनीयम्।

**"सं वपामि समाप औषधीभिः समोषधयो रसेन "**।[24]

वपितकृषौ खनिजद्रव्याणां जलानामवश्यकतां कथयन् यजुर्वेदः कथयति। **"सं रेवतीर्जगतीभिः पृच्यन्तां सं मधुमतीर्मधुमतीभिः पृच्यन्ताम्"** अर्थात् मधुरसेन युक्ताभिः ओषधिभिः द्रव्यैश्च सा कृषिः सम्पन्नो भवतु। वैदिककृषिः तदेव यस्यां पृथिवीं घृतमधुदुग्धपेयजलैः सिञ्चनं भवेत्।

**"घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमत मरुद्भिः।**
**ऊर्जस्वतीः पयसा पिन्वमानाऽस्मान्त्सीते पयसाभ्याववृत्स्व॥"**

उपर्युक्ते मन्त्रे ऊर्जस्वतीः पयसा पिन्वमाना आदयः कृषियोग्यभूमेः विशेषणाः सन्ति। घृतादिपदार्थाणां मिश्रणेन तेजस्वी मधुरं च भूमिकणैः उत्तमकृषेः प्राप्तिर्भवति।

वेदे कृषकाय **"कीनाशः"** इति पदप्रयुक्तः। "कुत्सितं नाशयतीति कीनाशः" अर्थात् यः दुर्भिक्षस्य दुर्दिनस्य च नाशं करोति। श्रेष्ठकृषेः कर्त्रे कीनाशाय यजुर्वेदे कथितमस्ति - "अन्नानां पतये नमः इराथैकीनाशम्"।

कृषिणा सहैव पशुपालनमपि वैदिककालीनपरम्परा आसीत्। यातायातस्य कार्यं, सन्देशवाहनं, भारवाहनमित्यादीनां कार्याणां ततश्च पशुपक्षिणां दर्शने शुभाशुभविचारः पशुपालनस्य कारणमासीत्। वेदेऽपि पशुपालनस्य निर्देशः प्राप्यते यथा यजुर्वेदे[25] इति मन्त्रे कथितमासीत्। **"उपहूता इह**

[22] अथर्ववेदः ४.१०.३
[23] यजुर्वेदः १८.२२
[24] यजुर्वेदः १.२१
[25] यजुर्वेदः ३.४५

**गावऽउपहूताऽअजायः।**" अर्थात् अस्माकं गृहेषु गावः अजाः आदयः पशवः भवन्तु, गवे वेदे अदन्या पदस्य प्रयोगं कृतमासीत्। अर्थात् सा अहिंसनीया इति। यजुर्वेदस्य चतुर्विंशेऽध्याये अनुमानतः द्विचत्वारिंशत् पशूनां त्रिसप्ततिश्च पक्षिणां विविधोपयोगविषये एवञ्च गुणधर्माणामुल्लेखोऽस्ति। एकोदाहरणो द्रष्टव्यः - "**अश्वस्तूपरो गोमृगस्ते प्राजापत्याः०**"[२६] अर्थात् अश्वः, मेढा (नीलगाय) प्रजापालकगुणयुक्ताः सन्ति। ऋतूनामागमनस्य ज्ञानं पक्षिभिः भवति। तदैव यजुर्वेदे कथितमस्ति।

"**वसन्ताय कपिञ्जलानालभते, ग्रीष्माय कलविङ्कान् वर्षाभ्यस्तित्तिरीन्।**
**शरदे वर्तिका हेमन्ताय करान् शिशिराय विककरान् ॥**"[२७]

एवमेव शिशुमारजलचरेण समुद्राभ्यन्तरस्य ज्ञानं मण्डूकैः मेघस्य ज्ञानं कर्तुं शक्यते अस्यैव प्रतिपादयन् कथितमस्ति -

"**समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकानद्भ्यो मत्स्यान्**"[२८]

वेदमन्त्राः कथयन्ति यत् दिनस्य रात्रेः अहोरात्रस्य च सन्धिकाले के के पक्षिणः उपयोगी भवितुं शक्यन्ते। यथा-

"**अह्ने पारावतानालभते रात्र्यै सीचापूरहोरात्रयोः।**
**सन्धिभ्यो जतूर्मासेभ्यो दात्यौहान्संवत्सराय महतः सुपर्णान् ॥**"[२९]

अर्थात् दिवसे कपोतः, रात्रौ सीचापूः, अहोरात्रे जतूः, मासस्य ज्ञानाय कृष्णकाकः, संवत्सराय सुपर्णः आदीनां पक्षीणामुपयोगं कर्तव्यम्। पशुपक्षिणां गुणधर्मं प्रतिपादयन् वेद उच्यते - "**सौरी बलाका**"[३०] बलाका सूर्य इव गुणवती। "**पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः**"[३१] पृषती, अल्पपृषती, सम्पूर्णपृषती च मित्रावरुणगुणयुक्ताः सन्ति।

एतदतिरिक्तमपि पशूनां गुणधर्मान् विवेचयन् वैदिकवाङ्मये पशुविज्ञानस्य पर्याप्तोल्लेखः प्राप्यते। वैदिकमन्त्रेषु वैज्ञानिकपद्धत्या यातायाताय प्रयोगं कर्तुं यन्त्रनिर्माणस्य शिक्षाया उल्लेखोऽपि लभ्यते। विमाननौकान्तरिक्षयानरथविद्युद्रथवायुरथादीनां निमार्णस्य उपयोगस्य च विधेर्वर्णनं वेदेषु प्राप्यते। नैतदाश्चर्यं यत् आधुनिकविज्ञानस्यापि केषाञ्चनांशानां वर्णनं वेदे लभ्यते। यतो हि वेदातिरिक्तानां

---

[२६] यजुर्वेदः २४.२
[२७] यजुर्वेदः २४.२०
[२८] यजुर्वेदः २४.२१
[२९] यजुर्वेदः २४.२५
[३०] यजुर्वेदः २४.३३
[३१] यजुर्वेदः २४.२

केषामपि पदार्थानां सत्तास्त्येव न । "**दिव्यं नमो गच्छ स्वाहा**" इति मन्त्रे कथितमस्ति यद् दिव्याकाशे ये घुतीकस्य सूक्ष्मं सोमजलमयस्य परिधयाः स्थानानि च सन्ति ते दिव्ययानेन ज्ञायन्ते।

"**वेदा यो वीनां पदमन्तरिक्षेण पतताम्। वेद नावः समुद्रियः**"[३२] इत्यस्मिन् मन्त्रे अन्तरिक्षयानस्य समुद्रयानस्य च सञ्चालननिर्माणप्रक्रियाविषये ज्ञातुं निर्देशः दत्त अस्ति। विमानस्य गुणान् वर्णयन् यजुर्वेदः कथयति -

"**इमौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्थ पहं स्यग्ने०**"। (१८.५२)

अर्थात् ते विमानस्य ये पक्षाः सन्ति ते दृढाः सन्ति। एतेषु पतनशीलगुणाः सन्ति, यत्रेच्छन्ति तत्र अवतरितुं शक्यन्ते। एते पक्षाः एतादृशाः सन्ति येषु मध्यस्य व्यवधानान् हे अग्ने त्वं नाशयसि। यन्त्रविज्ञानस्य शिक्षया सह वेदमन्त्रेषु अस्त्रशिक्षायाः सैन्यशिक्षायाश्चापि वर्णनं दृष्टिगोचरो जायते। "**नमः सेनाभ्यः सेनानिभ्यश्च वो नमः**" इति यजुर्वेदस्य मन्त्रः सैन्यशिक्षायाः प्रमाणं स्थापयति। धनुःशरप्रयोगस्य च शिक्षायाः निर्देशः प्रस्तुते मन्त्रे प्राप्यते —

**प्रमुञ्च धन्वनस्त्वमुभयोरात्न्योर्ज्याम् ।**
**याश्च ते हस्त इषवः परा ता भगवो वप ॥**

अर्थात् हे सेनापते ! तव हस्ते ये शराः सन्ति ते शत्रुषु प्रहाराय सन्ति। धनुषि पूर्वापरप्रत्यञ्चायामुपरि स्थापयित्वा शत्रुषु नलेन प्रक्षिपतु एवञ्च शत्रूणां बाणान् अपाकर। सेनाः प्रोत्साहनाय वाद्ययन्त्राणां प्रयोगः कर्तव्यः तदैव "**नमो दुन्दुभ्याय चाहनन्याय च**[३३]" मन्त्रस्योल्लेखः प्राप्यते। एतदतिरिक्तं वेदमन्त्राः भूसेनानां, भूगर्भसेनानां मार्गाणामेवञ्च अन्नरक्षकसेनानां वातविज्ञानयुक्तसेनानां वर्षणशीलद्युसेनानामित्यादीनां पृथक् सेनाः स्थापयितुं निर्देशाः तन्मन्त्रेषु सन्ति।

**नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः।**
**नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वातऽइषवः।।**

एतेषु मन्त्रेषु वातविज्ञानपूर्णसेनानां द्युसेनानां च सङ्केतः प्राप्यते। वेदेषु "आप्ता" इति नामकस्य एकस्य मन्त्रस्य नाम आयाति येन शत्रवः मूर्च्छतामुपयाति। रक्षासाधनानां कवचस्य महिमा - "**मर्माणि ते वर्मणा छादयामि०**" मन्त्रे कथितमस्ति। एतदतिरिक्तमश्वानां रथादीनां च युद्धसमयाय उपयोगमपि वेदस्य ऋक्षु प्राप्यते।

उपर्युक्तविवरणेन ज्ञायते यद् वैदिकसाहित्ये विभिन्नशिक्षाणां वर्णनं विस्तरेणाऽस्ति। आवश्यकमस्ति तत्त्ववेत्तृणाम्। यावत्यः शिक्षाः आधुनिकयुगे अभवन् तदपेक्षया अधिकविद्याः

---

[३२] ऋग्वेदः १.१२५.७
[३३] यजुर्वेदः १६.३५

वेदमन्त्रेषु निहिताः सन्ति। सम्भवमेव यत् अन्वेषणानन्तरमध्ययनानन्तरमन्याः अपि विद्याः प्रकाशिताः भवितुं शक्यन्ते।

वैदिकसाहित्ये वर्णिताः विविधकलाः शिक्षा (यासामुल्लेखः प्राक् कृताः सन्ति) भारतीयसंस्कृतेरेव अंशाः सन्ति। भारतीयसंस्कृतेर्मूलमपि वेदाः सन्ति इति सर्वे स्वीकुर्वन्ति। अस्माकं संस्कृतिः स्वाभ्यान्तरे सर्वे सिद्धान्ताः उपस्थापिताः ये वैदिकमन्त्रेषु धर्मशास्त्रेषु चोपदिष्टाः। राष्ट्रसङ्गठनस्य सिद्धान्तः प्रतिपादयन् वेदो निर्दिशति -

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।**
**देवा भागं यथापूर्वे संजानाना उपासते ॥**[३४]

इत्यपि मन्त्रे सर्वजनेभ्यः समभावस्योपदेशोऽस्ति -

**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति ॥**

इत्यस्मिन् मन्त्रे वर्णितमस्ति यद् युष्माकमध्यवसायाय हृदयमनांसि समानानि भवन्तु। साकमेव सर्वे निवसन्तु। एवञ्च वेदे व्यावहारिकतामपि स्थानं दत्तमस्ति। समाजे परस्परसहयोगेनैव निर्वाहः सम्भवति, एतस्याधारो वेदस्यास्यामृचि प्राप्यते —

**देहि मे ददामि ते नि मे धेहि नि ते दधे।**
**निहारं च हरासि मे निहारं निर्हराणि ते स्वाहा॥**

अर्थात् त्वं मह्यं देहि अहं तुभ्यं ददामि, त्वं मदुत्तमगुणान् धारय अहं त्वद्धारयामि। सत्यनैतिकता सदाचारपुरुषार्थाणां संस्कृतिं वैदिक्यः ऋचः उद्घोषयन्ति। यतः अस्माकं तात्पर्यं भवतु न वा वयं तां प्रति सद्भावनां पारयामः — **"यांश्च पश्यामि यांश्च न तेषु सुमतिं कृधि"**[३५] इति मन्त्रेण सुविचाराणां संस्कृतेः प्रतिपादनं भवति। शतपथब्राह्मणे **"सत्यमजेयमस्त्रम्"**[३६] इति कथयन् —

वेदानामस्याः ऋचः सिद्धान्तेन विश्वजनीनायाः सुस्थिरायाः संस्कृतेर्विकास अभूत्। सदा जाग्रदवस्थायां भूत्वा पुरुषार्थविधानस्य सिद्धान्तः **"भूत्यै जागरणम्"**[३७] इत्यतः प्राप्यते। यजुर्वेदस्य एकोनत्रिंशतेरध्यायस्य एकोनपञ्चाशत् मन्त्रः "**शर्म भवतु नस्तनूः**"। अस्माकं संस्कृतिः आशावादी अस्तीति सिद्ध्यति। इयं वैदिकसंस्कृतिः अस्मान् उन्नतिशीलजीवनाय प्रेरयति। "**तेन त्यक्तेन भुञ्जीथाः**"

[३४] ऋग्वेदः १०.९१.२
[३५] अथर्ववेदः १७.१.७
[३६] शत.ब्रा. ३.४.२.८
[३७] यजुर्वेदः ३०.१७

इत्यनेन निरपेक्षस्य भावस्य प्रतिपादिता संस्कृतिः वेदेभ्य एव प्राप्यते[३८], इति स्वस्तिवाचने इन्द्रसूर्यविष्णुबृहस्पतिभिः मानवमात्रस्य कल्याणस्य प्रार्थना विहिताऽस्ति ।

**"स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषाः विश्ववेदाः।**
**स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।"**

एतादृशः अन्यान्याः ऋचः भारतीयसंस्कृतेः उदारोदात्तानां जीवन्तभावानां च प्रकाशनं कुर्वन्ति, नैतावतं पर्याप्तं कथनेन । अपितु इति कथनं समुचितं स्याद्यत् वैदिकसाहित्यमेव अस्माकं संस्कृतेः जन्मदाता एतस्याः संरक्षणकर्ता पुष्टिकर्ता च अस्ति ।

डॉ. सुजाता त्रिपाठी
सहायकाचार्या व्याकरणविभागे,
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्,
कटवारियासरायः, नवदेहली—110016

[३८] सामवेदः २१.१.९